त्रयोदशः पाठः १३

# संहतिः श्रेयसी पुंसाम्

( क्त, क्तवतु प्रत्ययः )



(मिथिलाक्षेत्रे सामान्यजनाः अपि 'गोनू झा' नामकस्य पण्डितस्य कथाः जानन्ति। एतासु कथासु तस्य कुशाग्रबुद्धेः परिचयो भवति। अस्मिन् पाठे पारिवारिकविभाजनस्योपरि व्यंग्यः कृतोऽस्ति।)

एकस्मिन् कृषकपरिवारे भ्राताद्वयम् आसीत् सोमदत्तः प्रेमदत्तश्च। ज्येष्ठः सोमदत्तः चतुरः आसीत् किन्तु कनिष्ठः प्रेमदत्तस्तु सरलः आसीत्। तयोः पार्श्वे एकं कम्बलम् एका च महिषी आसीत्। एकदा तयोर्मध्ये एकः अनुबन्धः अभवत्।

अनुबन्धानुसारेण प्रेमदतः दिवसे क्षेत्रे कार्यं करिष्यति सोमदत्तः रात्रौ च। एवमेव दिवसे कम्बलस्य प्रयोगः अपि कनिष्ठः एव करिष्यति, सोमदत्तस्तु रात्रौ एव। एवं विचारयन्तौ तौ महिषिविषयेऽपि अनुबन्धः कृतवन्तौ। तेन महिष्याः शरीरस्य पूर्वार्धभागस्य स्वामी प्रेमदत्तः अभवत् सोमदत्तस्तु पश्चादर्धभागस्य स्वामी। अनुबन्धनात् पश्चात् प्रेमदत्तस्तु क्षेत्रे एकस्मिन् भागे कम्बलं स्थाप्य दिवसपर्यन्तं परिश्रमं करोति स्म। महिषीं भोजनादिना सेवते स्म। सोमदत्तस्तु कम्बलेन शरीरमाच्छाद्य रात्रौ क्षेत्रे शयनमेव करोति स्म। प्रातः-सांयकाले च दुग्धं प्राप्नोति। इत्थं सर्वदा प्रेमदत्तस्तु वञ्चितो भवति स्म।



स एकदा स्वमित्रं 'गोनू झा' नामकं पण्डितं पृष्टवान् - भोः ! किं करोमि ? सदा वञ्चितः अस्मि। गोनू झा प्रेमदत्ताय समुचितं परामर्शं दत्तवान्। गृहं गत्वा सः मित्रस्य कथनानुसारेण कम्बलं प्रक्षालनार्थम् अपराह्ने सूर्यास्तसमये जले स्थापितवान्। सायङ्काले सोमदत्तः पृष्टवान् कम्बलं कुत्रास्ति ?''तत् मलिनम्

जातम्। अतः मया प्रक्षालितम्।'' कम्बलं विना एव सोमदत्तः रात्रिशयनं कृतवान्।

अनन्तरं सः महिषीं दिवसे भोजनेन वञ्चितां कृतवान्। महिषी अतीव कुपिता। ततः सः दोहनकालेऽपि दण्डेन पूर्वार्द्धभागं तां ताडितवान् । अतः महिषी कुपिता भूत्वा दोहनकाले पादप्रहारेण सोमदत्तं ताडितवती । सः चतुरः क्रोधितः सम्भूय अकथयत् – ''भोः मूर्ख ! किं करोषि ? महिष्याः पूर्वार्धस्वामी प्रेमदत्तः उक्तवान् – ''अहं अस्याः शरीरस्य पूर्वार्धभागस्य स्वामी। यन्मे रोचते तदेव करोमि। अनेन तव किम्?'' इति भ्रातुः कथनं श्रुत्वा सोमदत्तः मूकः जातः। स्वधूर्ततायाः इदं फलं ज्ञात्वा लज्जितः च अभवत्।



ततः स पुनः महिषिविभाजनं निरर्थकं कथयन् क्षेत्रे कम्बले महिष्याः भोजनदाने दुग्धग्रहणे च उभौ समानौ स्वामिनौ इति स्वीकृतवान्। तेन द्वयोः लाभः जातः।

अतः परस्परं सदैव सहयोगेन सामञ्जस्येन च कार्यं करणीयम्। परिवारे स्वार्थसिद्धिपूर्वकं निरर्थकं विभाजनं न शोभते।



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एकदा | एकवारम् | एक बार |
| पूर्वार्धम् | प्रथमार्धम् | पहला आधा भाग |
| कुशाग्रः | तीक्ष्णः | तेज |
| कम्बलम् | ऊर्णकम् | कम्बल |
| प्रयोगः | उपयोगम् | उपयोग |
| वञ्चितः | विरहितः | ठगा गया |
| दोहनकाले | दुग्धग्रहणसमये | दूहने के समय |
| ताडनम् | प्रहारम् | मारना |
| मे | मह्यम् | मुझे |
| मूकः | तूष्णीम् | चुप रहना |
| जातः | अभवत् | हो गया |
| ततः | तत्पश्चात् | उसके बाद |
| निरर्थकम् | अनुपयोगी | बेकार |
| विभाजनम् | भागकरणम् | बँटवारा |

## अभ्यासः

### मौखिक प्रश्नाः

१. **अधोलिखितानां पदानां शुद्धोच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| स्वबौद्धिकम् | कुशाग्रबुद्धेः | भ्राताद्वयम् | पार्श्वे | तयोर्मध्ये |
| अनुबन्धः | विचारयन्तौ | स्थाप्य | भोजनादिना | वञ्चितः |
| प्रक्षालनार्थम् | उत्तरत | ताडितवान् | भूत्वा | पूर्वार्धम् |
| पादप्रहारेण | लज्जितश्च | सामञ्जस्येन | निरर्थकम् | विभाजनम् |

२. **गोनू झा नामकस्य पण्डितस्य अथवा तत्सदृशीम् अन्यां कथां श्रावयतु ।**

## लिखितप्रश्नाः

**१. अधोलिखितानि अशुद्धानि पदानि शुद्धानि कृत्वा लिखत –**

पार्श्वे    महिस्याः    आच्छद्य    पादप्रहारेन    भोजनदिना    पृष्ट्वान्

**२. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

(क) तयोः पार्श्वे किं किं आसीत् ?

(ख) प्रेमदत्तः कीदृशः आसीत् ?

(ग) सोमदत्तः महिष्याः शरीरस्य कस्य भागस्य स्वामी ?

(घ) प्रेमदत्तस्य मित्रं कः आसीत् ?

(ङ) परिवारे किं न शोभते ?

(च) परस्परं कथं कार्यं करणीयम् ?

**३. मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत**

| पादप्रहारेण, | समुचितम्, | लज्जितः, | सोमदत्तः, | महिषी |
|---|---|---|---|---|

(क) तौ ........................ विषयेऽपि अनुबन्धः कृतवन्तौ।

(ख) ................................ तु पश्चादर्धभागस्य स्वामी।

(ग) गोनू झा प्रेमदत्ताय ........................ परामर्शं दत्तवान्।

(घ) महिषी कुपितौ भूत्वा सोमदत्त ................. ताडितवती।

(ङ) स्वधूर्ततायाः इदं फलं ज्ञात्वा सः ................. अभवत्।

**४. रेखाङ्कितपदान् आधृत्य प्रश्ननिर्माणं कुरुत –**

**उदाहरणम् – एकदा तयोर्मध्ये एकः अनुबन्धः अभवत्।**

प्रश्नः – एकदा कयोः मध्ये एकः अनुबन्धः अभवत् ?

(क) एकस्मिन् कृषकपरिवारे भ्राताद्वयम् आसीत् ।

(ख) एकदा सः स्वमित्रं 'गोनू झा' नामकं पण्डितं पृष्टवान्।

(ग) सः कम्बलं प्रक्षालनार्थं जले स्थापितवान्।

(घ) स महिषीं भोजनेन वञ्चितां कृतवान्।

(ङ) सोमदत्तः मूको जातः।

## ५. निम्नपदान् स्वीकृत्य वाक्यरचनां कुरुत -

(क) पश्चात् ........................................... ।

(ख) ततः ........................................... ।

(ग) सायङ्काले ........................................... ।

(घ) सदा ........................................... ।

(ङ) इत्थम् ........................................... ।

## ६. निम्नपदानां सन्धिं / सन्धिविच्छेदं वा कुरुत -

| | | | | | |
|---|---|---|---|---|---|
| (क) | कम्बलमेकम् | = | .................. | + | .................. |
| (ख) | .................. | = | तयोः | + | मध्ये |
| (ग) | .................. | = | प्रेमदतः | + | तु |
| (घ) | विभाजनस्योपरि | = | .................. | + | .................. |
| (ङ) | पूर्वार्धम् | = | .................. | + | .................. |
| (च) | .................. | = | सदा | + | एव |

## योग्यता-विस्तारः

### ( क ) लेखकस्य संक्षिप्तपरिचयः



गोनू झा नामकस्य पण्डितस्य जन्म बिहारप्रान्तस्य मिथिलाक्षेत्रे सिंहवाडाप्रखण्डे भरौरानामग्रामे पञ्चशतं वर्षाणि पूर्वम् अभवत्। एतस्य पिता धार्मिकपुरुषः आसीत्। अतः गोनू अपि तादृशः धार्मिकः अभवत्। गोनू कालिकायाः परमोपासकः आसीत्। सः प्रत्युत्पन्नमतिः परिहासप्रियश्चासीत्। स्वबुद्धिकौशलेन मिथिलासाम्राज्यस्य पदाधिकारी अभवत्। किंवदन्तिरूपेण तस्य अनेकाः कथाः सामाजिकानां मानसम् आनन्दाप्लावितं कुर्वन्ति।

### ( ख ) गोनू - झा - पण्डितस्य अन्या कथा -

एकस्यां पूर्णिमायां रात्रौ गोनूपण्डितस्य गृहे केचन चौराः प्रविष्टाः। तस्य भार्या अवदत् - "स्वामिन्! प्रतीयते यत् गृहाभ्यन्तरे चौराः आगताः।" इति ।

पण्डितः चौरान् श्रावयन् उच्चैः अवदत् - "चिन्ता मास्तु! अहं सर्वं धनं अस्माकं क्षेत्रस्य गर्भे

स्थापितवान्। चौराः तत् धनं न प्राप्तुं शक्नुवन्ति।'' इति

पण्डितस्य वाणीं श्रुत्वा चौराः गृहात् निर्गत्य क्षेत्रम् अगच्छन्। ततः रात्रौ सम्पूर्णं क्षेत्रं कर्षितवन्तः। सूर्योदयात् पूर्वमेव पण्डितः क्षेत्रं गत्वा चौरान् सम्बोध्य अवोचत् – ''भवन्तः मम क्षेत्रं कर्षितवन्तः तत्कृते धन्यवादः। चौराः लज्जिताः भूत्वा ततः पलायिताः।

आगामिनी अमावस्यां रात्रौ चौराः पुनः गोनूपण्डितस्य गृहम् आगताः। जागृता पत्नी अवदत् – ''प्रतीयते अद्य पुनः चौराः प्रविष्टाः।'' इति

गोनू झा प्रत्युतरत – ''मा विभेषि। इदानीं तु मया धनं सुरक्षितस्थाने स्थापितम्।''

''कुत्र'' इति तस्य भार्या अपृच्छत्।

गोनू झा अवदत् – अहं धनं स्यूते स्थाप्य तं स्यूतं वृक्षस्य शाखायां लम्बितवान् अस्मि।

एतत् श्रुत्वा चौराः वृक्षमारुह्य स्यूतस्य अन्वेषणं कृतवन्तः । तेषु एकः वृक्षोपरि स्यूतं मत्वा मधुमक्षिकाणां छत्रे स्वहस्तं प्रावेशितवान्। मधुमक्षिकाः तेषामुपरि आक्रमणं कृतवत्यः। गोनू झा तत्रागत्य हसन् अवदत् – ''उपचारार्थम् औषधीं स्वीकरोतु'' इति।

चौराः भविष्ये गोनू झा पण्डितस्य गृहे चौरकार्यस्य विचारमेव त्यक्तवन्तः।

## (ग) प्रत्ययः

भूतकालिकक्रियायाः प्रकटीकरणार्थं क्त–क्तवतु प्रयोगोऽपि क्रियते। एतयोः प्रत्ययोः निर्मितशब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

### क्तप्रत्ययः

| | पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| गम्+क्त | गतः | गता | गतम् |
| लिख्+क्त | लिखितः | लिखिता | लिखितम् |
| दृश्+क्त | दृष्टः | दृष्टा | दृष्टम् |
| लभ्+क्त | लब्धः | लब्धा | लब्धम् |
| श्रु+क्त | श्रुतः | श्रुता | श्रुतम् |
| कृ+क्त | कृतः | कृता | कृतम् |
| दा+क्त | दत्तः | दत्ता | दत्तम् |
| पा+क्त | पीतः | पीता | पीतम् |
| नी+क्त | नीतः | नीता | नीतम् |

क्तप्रत्ययेन निर्मितपदानां रूपाणि पुँल्लिङ्गे रामवत् स्त्रीलिङ्गे लतावत् नपुंसकलिङ्गे फलवत् प्रचलन्ति।

## क्तवतुप्रत्ययः

| | पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| गम्+क्तवतु | गतवान् | गतवती | गतवत् |
| लिख्+क्तवतु | लिखितवान् | लिखितवती | लिखितवत् |
| नम्+क्तवतु | नतवान् | नतवती | नतवत् |
| भू+क्तवतु | भूतवान् | भूतवती | भूतवत् |
| हस्+क्तवतु | हसितवान् | हसितवती | हसितवत् |
| रुच्+क्तवतु | रोचितवान् | रोचितवती | रोचितवत् |
| याच्+क्तवतु | याचितवान् | याचितवती | याचितवत् |
| क्री+क्तवतु | क्रीतवान् | क्रीतवती | क्रीतवत् |
| ज्ञा+क्तवतु | ज्ञातवान् | ज्ञातवती | ज्ञातवत् |